# ગોષ્ઠેશ્વરાષ્ટકમ

સત્યજ્ઞાનમનન્તમદ્વયસુખાકારં ગુહાન્તઃસ્થિત-
શ્રીચિદ્વ્યોમ્નિ ચિદર્કરૂપમમલં યદ બ્રહ્મ તત્ત્વં પરમ .
નિર્બીજસ્થલમધ્યભાગવિલસદ્ગોષ્ઠોત્થવલ્મીક-
સંભૂતં સત પુરતો વિભાત્યહહ તદ્ગોષ્ઠેશલિઙ્ગાત્મના .. ૧..
સર્વજ્ઞત્વનિદાનભૂતકરુણામૂર્તિસ્વરૂપામલા
ચિચ્છક્તિર્જડશક્તિકૈતવવશાત કાચીનદીત્વં ગતા .
વલ્મીકાશ્રયગોષ્ઠનાયકપરબ્રહ્મૈક્યકર્ત્રી મુહુઃ
નૃણાં સ્નાનકૃતાં વિભાતિ સતતં શ્રીપિપ્પિલારણ્યગા .. ૨..
શ્રીમદ્રાજતશૈલશૃઙ્ગવિલસચ્છ્રીમદ્ગુહાયાં મહી-
વાર્વહ્ન્યાશુગખાત્મિકી વિજયતે યા પચલિઙ્ગાકૃતિઃ .
સૈવાશક્તજનેષુ ભૂરિકૃપયા શ્રીપિપ્પિલારણ્યગે
વલ્મીકે કિલ ગોષ્ઠનાયકમહાલિઙ્ગાત્મના ભાસતે .. ૩..
યત્રાદ્યાપ્યણિમાદિસિદ્ધિનિપુણાઃ સિદ્ધેશ્વરાણાં ગણાઃ
તત્તદ્દિવ્યગુહાસુ સન્તિ યમિદૃગ્દૃશ્યા મહાવૈભવાઃ .
યત્રૈવ ધ્વનિરર્ધરાત્રસમયે પુણ્યાત્મભિઃ શ્રૂયતે
પૂજાવાદ્યસમુત્થિતઃ સુમનસાં તં રાજતાદ્રિં ભજે .. ૪..
શ્રીમદ્રાજતપર્વતાકૃતિધરસ્યાર્ધેન્દુચૂડામણે-
ર્લોમૈકં કિલ વામકર્ણજનિતં કાચીતરુત્વં ગતમ .
તસ્માદુત્તરવાહિની ભુવિ ભવાન્યાખ્યા તતઃ પૂર્વગા
કાચીનદ્યભિધા ચ પશ્ચિમગતા નિલાનદી પાવની .. ૫..
શ્રીમદ્ભાર્ગવહસ્તલગ્નપરશુવ્યાઘટ્ટનાદ દારિતે
ક્ષોણીધ્રે સતિ વામદક્ષિણગિરિદ્વન્દ્વાત્મના ભેદિતે .
તન્મધ્યપ્રથિતે વિદારધરણીભાગેતિનદ્યાશ્રયે
સા નીલાતટિની પુનાતિ હિ સદા કલ્પાદિગાન પ્રાણિનઃ .. ૬..

કલ્પાદિસ્થલમધ્યભાગનિલયે શ્રીવિશ્વનાથાભિધે
લિઙ્ગે પિપ્પિલકાનનાન્તરગતશ્રીગોષ્ઠનાથાભિધઃ .
શ્રીશંભુઃ કરુણાનિધિઃ પ્રકુરુતે સાંનિધ્યમન્યાદૃશં
તત્પત્ની ચ વિરાજતેઽત્ર તુ વિશાલાક્ષીતિ નામાઙ્કિતા .. ૭..
શ્રીકાચીતરુમૂલપાવનતલં ભ્રાજત્ત્રિવેણ્યુદ્ભવં
ત્યક્ત્વાન્યત્ર વિધાતુમિચ્છતિ મુહુર્યસ્તીર્થયાત્રાદિકમ .
સોઽયં હસ્તગતં વિહાય કુધિયા શાખાગ્રલીનં વૃથા
યષ્ટ્યા તાડિતુમીહતે જડમતિર્નિઃસારતુચ્છં ફલમ .. ૮..
શ્રીમદ્ભ્રાજતશૈલોત્થત્રિવેણીમહિમાઙ્કિતમ .
ગોષ્ઠેશ્વરાષ્ટકમિદં સારજ્ઞૈરવલોક્યતામ .. ૯..
ઇતિ ગોષ્ઠેશ્વરાષ્ટકં સંપૂર્ણમ